International Journal of Sanskrit Research 2016; 2(6): 53-54

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2016; 2(6): 53-54
© 2016 IJSR
www.anantaajournal.com
Received: 11-09-2016
Accepted: 12-10-2016

**Sayanti Gorai**
Guest Lecturer, Jogamaya Devi College, Kolkata, India

**Correspondence**
**Sayanti Gorai**
Guest Lecturer, Jogamaya Devi College, Kolkata, India

# शब्दब्रह्मोपलब्धौ वेदस्यास्यत्वम्

## Sayanti Gorai

“वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्”, “वेदाद् धर्मो हि निर्भवौ” इत्यादि- स्मृतिवचनात् वेदस्य महनीयत्वं तु सर्वजनविदितवेद्यमेव नास्ति तत्र क्वचित्संशयावकाशः । वस्तुतः रत्नाकरः खलु अखिलवेदः । वेद एव सर्वाङ्गोपाङ्गविद्यायाः योनिस्वरूपः । यदि च स्वीक्रियते प्रणवः औम् वा वेद एव, तर्हि तस्यैवाङ्गोपाङ्गतः विद्याभेदस्योत्पत्तिरिति स्वीकरणीयम् । छान्दग्योपनिषदः सप्तमाध्याये सनत्कुमारनारदसंवादे आम्नातं तावत् –
“ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वाणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद् भगवोऽध्येमि” इति ।।
अतः प्रणवात्मक उतो वा मन्त्र-ब्राह्मण-मीमांसात्मकः अङगोपाङ्गविद्यानां योनित्वात् पुरुषस्य ज्ञानस्य संस्कारस्य तथा च धर्मस्य उद्रेको भवति वेदः । ज्ञानमित्यनेन अद्वैतब्रह्मविषयकज्ञानस्यैव प्रतीतिः भूयते । वस्तुतः धर्मार्थकाममोक्षा इति चतुर्वर्गपुरुषार्थेषु चरमस्तु मोक्षलाभः ब्रह्मप्राप्तिर्वा । तेनैव ऐकान्तिकसांसारिकमोहबन्धनात् मुक्तिर्जायते निरन्तरानन्दानुभूतिश्च जायते । वैयाकरणमते शब्दस्तु ब्रह्मस्वरूपः अक्षरात्मकः। शब्दानां यथार्थतया ज्ञानेनैव मुक्तिर्जायते इति शाब्दिकानां चरमराद्धान्तः। शब्दब्रह्मतत्त्वं प्रतिपादयति आचार्यभर्तृहरिः तदीये वाक्यपदीय-ब्रह्मकाण्डे –

“अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ।। इति ।।”[1]

अस्य शब्दब्रह्मणः प्राप्तिं विना न कदापि पुरुषार्थः सार्थकपदवीमधिरोहति । कस्तर्हि प्राप्तेरुपायः ? शब्दब्रह्मणः सायुज्यप्राप्तेरुपायस्तु वेद एव । व्याकरणं तु सहायकमात्रमेव, शब्दानुशासनेन शब्दानां साधुत्वनिर्णयो भवति । तदुच्यते “एकः शब्दः सुज्ञातः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके च कामधुग् भवति”। इति । वेदस्य शब्दब्रह्मणः प्राप्तेरुपायत्वं प्रस्तौति वैयाकरणाचार्यः भर्तृहरिः वाक्यपदीये ब्रह्मकाण्डे –

“प्राप्तेरुपायोऽनुकारश्च तस्य वेदो महर्षिभिः ।
एकोऽप्यनेकवर्म्येव समाम्नातः पृथक् पृथक् ।।”इति ।।[2]

तात्पर्यं तावत् तस्य ब्रह्मणः प्राप्त्युपायः अनुकारश्च वेदः । स च यद्यपि एकः, तथापि कलौ नृणां शक्तिवैकल्यादनेकवर्त्मेव ऋग्यजुःसामरूपभेदेन तत्तच्छाखाभेदेन संहिता-पद-क्रमादिभेदेन च पृथक् पृथक् समाम्नातः इति योजना । वस्तुतः दर्शान्तरेषु मतान्तरेषु च ब्रह्मप्राप्तिः बहुधा विद्यन्ते । ब्रह्मप्राप्तिविषये सन्ति उपनिषत्सांख्य-योग-वौद्धमताः, तथापि सर्वविधविकल्पस्य आकरो भवति वेद एव । रुचिभेदे अधिकराभेदे वा कमपि दार्शनिकमतं प्रति पुरुषस्य आसक्ति परिलक्ष्यते । सुष्ठूक्तं शिवमहिम्नस्तोत्रे पुष्पदन्तेन –

“त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव ।।”इति ।।[3]

---

[1] भर्तृहरिविरचितस्य वाक्यपदीय-ब्रह्मकाण्डस्य प्रथमश्लोकः ।

[2] भर्तृहरिविरचितस्य वाक्यपदीय-ब्रह्मकाण्डस्य पञ्चमश्लोकः ।

[3] विषयेऽस्मिन् श्रीप्रत्यभिज्ञायामुत्पलाचार्येणोक्तं यत् –
“यथारुचि यथार्थित्वं यथाव्युत्पत्ति भिद्यते ।
आभासोऽप्यर्थ एकस्मिन्ननुसन्धानसाधितः”।।इति।।

एवमेव आचार्यभर्तृहरिः तदीये सोपज्ञटीकायां ब्रह्मोपलब्धेः दशविकल्पाः प्रदर्शिताः– ते च "ममाहमित्यहङ्कारग्रन्थिसमतिक्रममात्रं ब्रह्मणः प्राप्तः, विकाराणां प्रकृतिभावापत्तिरित्यपरे, वैकरण्यम्, असाधना परितृप्तिः, आत्मतत्त्वम्, आत्मकामत्वम्, अनागन्तुकार्थत्वम्, परिपूर्णशक्तित्वम्, कालवृत्तीनामात्ममात्रस्वमावेशः, सर्वात्मना नैरात्म्यमिति प्राप्तिविकल्पाः ।" इति ।

वेद एव परमतत्त्वशब्दब्रह्मणः अनुकारः प्रतिबिम्बस्वरूपो वा । यथा स्वप्नवृत्तिः नः जाग्रद्वृत्तेरेव अनुकरणमात्रस्वरूपा, अनुरूपतया साक्षात्कृतधर्मा ऋषयः यस्य परमसूक्ष्मशब्दतत्त्वस्य दर्शनं कृतवन्तः तेषामेव निबन्धनात्मकरूपोऽयं वेदः ।[4] शब्दराशिस्वरूपोऽयं वेदः अनेकवर्त्मनि बहुधा विभक्तः । तस्य च वेदस्य भेदानां चतुर्णाम् ऋग्यजुःसामाथर्वणां शाखाबाहुल्येन बहुमार्गत्वं, सर्वेषां मार्गाणां चैकत्र कर्मणि अङ्गता, शाखासु पठितानां तत्तच्छब्दानामर्थप्रत्यायनेऽभ्युदये च यतशक्तित्वम्, नियतकार्योत्पादकत्वेन नियतशक्तित्वञ्च दृश्यते इति । वस्तुतः शाखाभेदेऽपि एककर्मत्वस्यैव धारा दृश्यते वेदे । ननु ईदृशे बहुशाखाभेदस्य वेदस्य एककर्तृत्वं सम्भवति न वेति समाधाने आचार्यजयन्तभट्टः सुष्ठूक्तं न्यायमञ्जर्य्याम् –

"अतश्चैककर्तृका वेदा यतः परस्परव्यतिषक्तार्थोपदेशिनो दृश्यन्ते । एकमेव हि कर्म वेदचतुष्टयोपदिष्टैः पृथग्भूतरप्येकार्थसमवायिभिरन्वितं प्रयुज्यते। तत्र हि पैप्पलादादिशाखाभेदोपदिष्टं च तत्तदङ्गजातं तत्र तत्रापेक्षते, तत्र सर्वशाखाप्रत्ययमेकं कर्मेत्याहुः।" इति ।[5]

भारतीयज्ञानमार्गपरम्परायां तु नवदार्शनिकसम्प्रदायाः दृश्यन्ते। तेषां समेषामेव सम्प्रदायानां तुरीयराद्धान्तस्तु मोक्षप्राप्तिः। यदि वेद एव सर्वेषाम् आकरः स्यात् तर्हि दर्शनभेदः भिन्नमतं च व्यर्थः स्यात्। विशेषतः वैयाकरणाः तु शाब्दिकाः । ते शब्दानुशासनेनैव मोक्षलाभं स्वीकुर्वन्ति। तर्हि कथं वैमत्यं ब्रह्मलाभे? अत्र मतं तावत् यद्यपि सम्प्रदायभेदः दृश्यते, सम्प्रदायभेदे मतवैभिन्नमपि परिदृश्यते तथापि नात्रासङ्गतिः । वेदतः एव समेषामेव उत्पत्तिः । सर्वत्रैव वेदस्य प्रभावः नितरामेव दृग्गोचरीभूयते । तद्धि उच्यते भर्तृहरिणा –

"स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः ।
तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः ॥"इति।[6]

वेदे तु सत्या विशुद्धिः एकपदागमा प्रणवरूपेण युक्ता सर्ववादाविरोधिनी विद्यैव उक्ता। व्याकरणेन यद्यपि शब्दानुशासनं जायते येन शब्दब्रह्मोपलब्धिर्जायते तथापि व्याकरणं वेदस्याङ्गत्वात्, वेदत एव सर्वस्मृतिशास्त्राणां सर्वदर्शनशास्त्राणाञ्च उत्पत्तित्वात् वेदस्य श्रेष्ठत्वं स्वत एव प्रतिष्ठितम् । इति शिवम् ।

**ग्रन्थस्रोतांसि**


1. जयन्तभट्टः, न्यायमञ्जरी . सम्पा. प्रवाल-कुमार-सेनः. कलिकाताः संस्कृत-बुक्-डिपो. 2013.
2. भर्तृहरिः. वाक्यपदीयम् (हरिवृषभकृतया स्वोपज्ञवृत्त्या, पद्मश्रीपण्डितरघुनाथशर्मणा विरचितया अम्बाकर्त्रीव्याख्यया च सहितम्). प्रकाशकः डः हरिश्चन्द्रमणित्रिपाठी. वाराणसीः सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २००६ (चतुर्थसंस्करणम्).
3. भर्तृहरिः. वाक्यपदीयम् (ब्रह्मकाण्डम्). सम्पा. विष्णुपदभट्टाचार्यः. कलिकाताः पश्चिमवङ्गराज्यपुस्तकपर्षत्, २००७ (पुनर्मुद्रणम्).
4. भर्तृहरिः. वाक्यपदीयम् (ब्रह्मकाण्डम्). सम्पा. शिवनाथ-अवस्थी. चौखम्बा-विद्याभवन. वाराणसीः
5. हालदारः, गुरुपदः. व्याकरण दर्शनेर इतिहास. कलिकाताः संस्कृत-बुक्-डिपो, २००६ (पुनर्मुद्रणम्) (बङ्गभाषायाम्)


[4] हरिवृषभकृतायां स्वोपज्ञवृत्यां परिलक्ष्यते – "साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुः, उपदेशाय ग्लायन्तोऽपरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च।" इति ।

[5] जयन्तभट्टकृतन्यायमञ्जर्य्याः प्रथमभागः।

[6] भर्तृहरिविरचितस्य वाक्यपदीय-ब्रह्मकाण्डस्य सप्तमश्लोकः ।